# Shukra Stava

## શુક્રસ્તવરાજઃ

## Document Information

Text title : shukrastavarAjastotram

File name : shukrastavarAja.itx

Category : stavarAja, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Sunder Hattangadi Vineet Menon

Proofread by : Sunder Hattangadi, Vineet Menon

Source : brahmayAmalatantra

Latest update : April 26, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 26, 2023

*sanskritdocuments.org*

Shukra Stava

# શુક્રસ્તવરાજઃ

અસ્ય શ્રીશુક્રસ્તવરાજસ્ય પ્રજાપતિઃ ઋષિઃ અનુષ્ટુપ્ છન્દઃ
શુક્રો દેવતા શ્રીશુક્રપ્રીત્યર્થે પાઠે વિનિયોગઃ ॥

નમસ્તે ભાર્ગવશ્રેષ્ઠ દૈત્યદાનવપૂજિત ।
વૃષ્ટિરોધપ્રકર્ત્રે ચ વૃષ્ટિકર્ત્રે નમો નમઃ ॥ ૧॥

દેવયાનિપિતસ્તુભ્યં વેદવેદાઙ્ગપારગ ।
પરેણ તપસા શુદ્ધઃ શઙ્કરો લોકસુન્દરઃ ॥ ૨॥

પ્રાપ્તૌ વિદ્યાં જીવનાખ્યાં તસ્મૈ શુક્રાત્મને નમઃ ।
નમસ્તસ્મૈ ભગવતે ભૃગુપુત્રાય વેધસે ॥ ૩॥

તારામણ્ડલમધ્યસ્થ સ્વભાસાભાસિતામ્બરઃ ।
યસ્યોદયે જગત્સર્વં મઙ્ગલાર્હં ભવેદિહ ॥ ૪॥

અસ્તં યાતે હ્યરિષ્ટં સ્યાત્તસ્મૈ મઙ્ગલરૂપિણે ।
ત્રિપુરાવાસિનો દૈત્યાન્ શિવબાણપ્રપીડિતાન્ ॥ ૫॥

વિદ્યયાઽજીવયચ્છુક્રો નમસ્તે ભૃગુનન્દન ।
યયાતિગુરવે તુભ્યં નમસ્તે કવિનન્દન ॥ ૬॥

વલિરાજ્યપ્રદો જીવસ્તસ્મૈ જીવાત્મને નમઃ ।
ભાર્ગવાય નમસ્તુભ્યં પૂર્વગીર્વાણવન્દિત ॥ ૭॥

જીવપુત્રાય યો વિદ્યાં પ્રાદાત્તસ્મૈ નમો નમઃ ।
નમઃ શુક્રાય કાવ્યાય ભૃગુપુત્રાય ધીમહિ ॥ ૮॥

નમઃ કારણરૂપાય નમસ્તે કારણાત્મને ।
સ્તવરાજમિમં પુણ્યં ભાર્ગવસ્ય મહાત્મનઃ ॥ ૯॥

યઃ પઠેચ્છૃણુયાદ્વાપિ લભતે વાઞ્છિતં ફલમ્ ।
પુત્રકામો લભેત્પુત્રાન્ શ્રીકામો લભતે શ્રિયમ્ ॥ ૧૦॥

રાજ્યકામો લભેદ્રાજ્યં સ્ત્રીકામઃ સ્ત્રિયમુત્તમામ્ ।
ભૃગુવારે પ્રયત્નેન પઠિતવ્યં સમાહિતૈઃ ॥ ૧૧॥

અન્યવારે તુ હોરાયાં પૂજયેદ્ભૃગુનન્દનમ્ ।
રોગાર્તો મુચ્યતે રોગાદ્ભયાર્તો મુચ્યતે ભયાત્ ॥ ૧૨॥

યદ્યત્પ્રાર્થયતે જન્તુસ્તત્તત્પ્રાપ્નોતિ સર્વદા ।
પ્રાતઃકાલે પ્રકર્તવ્યા ભૃગુપૂજા પ્રયત્નતઃ ।
સર્વપાપવિનિર્મુક્તઃ પ્રાપ્નુયાચ્છિવસન્નિધિમ્ ॥ ૧૩॥

ઇતિ શ્રીબ્રહ્મયામલે શુક્રસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Encoded and proofread by Sunder Hattangadi
Vineet Menon

*Shukra Stava*

pdf was typeset on April 26, 2023

Please send corrections to *sanskrit@cheerful.com*